नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **28**

No. of Printed Pages – **8**

# VU-94-Sans. Vangmay

## संस्कृत वाङ्मय (अनिवार्यः)

**वरिष्ठ उपाध्याय परीक्षा, 2021**

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामाङ्कः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः समाधेयाः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि ।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

| खण्ड | प्रश्नों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड–अ (A) | 1 (i से x), 2 से 11 = 20 | 1 | 20 |
| खण्ड–ब (B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड–स (C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड–द (D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड–य (E) | 26 से 28 = 3 | 6 | 18 |

OFFICE COPY

## खण्ड – अ (A)

1. अधोलिखितप्रश्नानाम् उत्तराणि उचितक्रमाक्षरेण लिखत – 1 × 10 = 10

(i) "शैवः" इत्यत्र प्रत्ययोऽस्ति –

(अ) अण् (ब) अञ्

(स) अङ् (द) घ

(ii) लकाराः कति –

(अ) नव (ब) षड्

(स) दश (द) पञ्च

(iii) शिववीरः निवसति स्म –

(अ) जयदुर्गे (ब) प्रतापदुर्गे

(स) सिंहदुर्गे (द) रक्तदुर्गे

(iv) 'शिवराजविजयः' कति विरामेषु विभक्तः अस्ति –

(अ) त्रिषु (ब) पञ्चसु

(स) चतुर्षु (द) नवसु

(v) मातुलस्य पत्नी

(अ) याता (ब) प्रजावती

(स) स्वसा (द) मातुली

(vi) अम्भोदाः कुत्र वसन्ति ?

(अ) पाताले (ब) वृक्षे

(स) गगने (द) पृथिव्याम्

OFFICE COPY

(vii) कैरवचक्रवालं कः विकासयति ?

(अ) दिनकरः (ब) जलधरः

(स) सज्जनः (द) चन्द्रः

(viii) यः सुचरितैः पितरं प्रीणयेत् सः कः ?

(अ) मित्रः (ब) पुत्रः

(स) सज्जनः (द) नरः

(ix) अहोरात्रे कति प्रहराः भवन्ति ?

(अ) चत्वारः (ब) सप्त

(स) अष्ट (द) दश

(x) सिंहस्याधिपति ग्रहः कः ?

(अ) सूर्यः (ब) मङ्गलः

(स) शुक्रः (द) शनिः

OFFICE COPY

एकेन वाक्येन उत्तरत –

2. "दाक्षिः" इत्यत्र कः प्रत्ययः ? 1

3. प्रथमवयस्क–कन्यायाः नाम लिखत । 1

4. वीरस्य मातुः नाम किम् ? 1

5. पत्युः पत्न्या वा पितुः नाम लिखत । 1

6. रात्रिः गमिष्यति तदा किं भविष्यति ? 1

7. "जटाओं से संन्यासी प्रतीत होता है ।" इत्यस्य वाक्यस्य संस्कृतेन अनुवादः करणीयः । 1

8. "जनकं नमः" शुद्धं लिखत । 1

समुचितेन पदेन रिक्तस्थानानि पूरयत –

9. "आशिषि __________" इति सूत्रं पूरयत । 1

10. __________ धातोरनभ्यासस्य" इति सूत्रं पूरयत । 1

11. "शेषात्कर्तरि __________" इति सूत्रं पूरयत । 1

## खण्ड – ब (B)

12. "आश्वपतम्" "बाहीकः" इत्यनयोः लौकिकविग्रहं लिखत । 2

13. शिवराजविजयस्य रचनाकारस्य परिचयो देयः । 2

14. नीतिशतककारस्य परिचयविषये लेख्यः । 2

15. "मनुष्यस्य" चत्वारि नामानि लेखनीयानि । 2

16. "देहस्य" चत्वारि नामानि लेखनीयानि । 2

17. आचार्या–आचार्यानी इत्यनयोः अर्थभेदः प्रदर्शनीयः । 2

18. अवकहाचक्रानुसारं वारक्रमं प्रस्तूयताम् । 2

19. राशीनां नामानि लिखत । 2

OFFICE COPY

## खण्ड – स (C)

20. कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या – $2 \times 2 = 4$

शुक्राद्धन, नड-शादाड्ड्वलच्,

राष्ट्राऽवारपाराद् घखौ, वर्गान्ताच्च ।

21. करणनामानि **अथवा** मासनामानि लेखनीयानि । 4

22. केषाञ्चित् चतुर्णां संस्कृतेन अनुवादो विधेयः – $1 \times 4 = 4$

(क) कवियों में कालिदास श्रेष्ठ है ।

(ख) बालिका नगर की ओर जाती है ।

(ग) चन्द्रेश ने सूर्य को देखा ।

(घ) वह कहानियाँ पढ़ेगा ।

(ङ) मनुष्य एक सामाजिक प्राणी है ।

(च) भारतीय संस्कृति संस्कृत में निहित है ।

OFFICE COPY

23. केषाञ्चित् चतुर्णां रेखाङ्कितपदेषु अशुद्धि-संशोधनं कुरुत । $1 \times 4 = 4$

(क) नेत्रस्य काणः ।

(ख) नृपात् वसुधां याचते ।

(ग) नगरस्य उभयतः वनमस्ति ।

(घ) चत्वारः नरः तिष्ठन्ति ।

(ङ) वयं दृश्यामः ।

(च) विद्या सत्यात् शोभते ।

## खण्ड – द (D)

24. कस्याप्येकस्य गद्यांशस्य सप्रसङ्ग व्याख्या लेखनीया –

1 + 4 = 5

(अ) अथ यावद् द्वारस्थ – स्तम्भोपरि संस्थापितायां काच–मञ्जुषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः, तावत्संन्यासिनोक्तम् – दौवारिक ! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः ? ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्यां, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत् ।

(ब) शिववीरः – साधु, साधु कथं न स्यादेवम् ? भारतवर्षीया यूयं, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतवर्षं भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः तमेते जाल्माः समूलमुच्छिन्दन्ति अस्ति च "प्राणा यान्तु, न च धर्मः" इत्यार्याणां दृढः सिद्धान्तः ।

OFFICE COPY

25. कस्याप्येकस्य श्लोकस्य प्रसङ्गान्वयभावार्थसहिता व्याख्या विधेया –

1 + 1 + 1 + 2 = 5

(अ) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्ध–परार्द्ध भिन्ना,
छायेव मैत्री खल–संज्जनानाम् ।।

(ब) अकरुणत्वमकारणविग्रहः
परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ।।

## खण्ड – य (E)

26. यथेच्छं त्रीणि रूपाणि साधनीयानि – $2 \times 3 = 6$

गव्यम्, स्त्रैणः, वासुदेवः, रैवतिकः, ग्रामता, शिखावलः ।

27. यथेच्छं त्रीणि रूपाणि साधनीयानि – $2 \times 3 = 6$

नित्यः शालीयः, आस्माकीनः, मध्यमः, दन्त्यम्, सममयम् ।

OFFICE COPY

28. यथेच्छं त्रीणि रूपाणि साधनीयानि – $2 \times 3 = 6$

भवसि, बभूवतुः, भवितारौ, भविष्यति, अभवन्, भवेत्

---

DO NOT WRITE ANYTHING HERE